National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(59): 232-233
© 2025 NJHSR
www.sanskritarticle.com

**रामापुरम् देवी कल्याणी**
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**रामापुरम् देवी कल्याणी**
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# अन्यथासक्षमाणां शिक्षाविषये राष्ट्रियशैक्षिकानुसन्धान प्रशिक्षणपरिषदेः भूमिका

**रामापुरम् देवी कल्याणी**

**सारांशः-**

भारते विद्यालयीयशिक्षाव्यवस्थां निर्माणे राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषदेः भूमिका महता वर्तते। अन्यथासक्षमाणां समावेशे बलं प्रददाति। दिव्याङ्गाधिकाराधिनियमः (२०१६), राष्ट्रियशिक्षानीतिः (२०२०) अनुगुणम् च अधिगमावकाशान् प्रदातुं राष्ट्रियशैक्षिकानुसन्धान-प्रशिक्षणपरिषद् कार्यं करोति। अस्मिन् पत्रे पाठ्यचर्याविकासे, शिक्षकप्रशिक्षणे, अधिगमोप-करणानां संसाधनानाञ्च प्रकल्पने अनुभूयमानावरोधानां विषये प्रतिपादितम्।

**प्रधानसंसूचकानि-** राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, समावेशीशिक्षा, अन्यथासक्षमः, शिक्षकप्रशिक्षणम्, पाठ्यचर्याविकासः, राष्ट्रियशिक्षानीतिः (२०२०), दिव्याङ्गाधकाराधिनियमः (२०१६)

**उपोद्घातः-**

भारते विद्यालयिशिक्षा सम्बद्धसूचनानां प्रदाने राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषदः भूमिका महता वर्तते। इयं परिषद् १९६१ तमे संवत्सरे संस्थापिता। अनया परिषदा विद्यालयिशिक्षाः, शिक्षकप्रशिक्षणम्, शैक्षिकानुसन्धानम्, समावेशीशिक्षा, गुणवत्ताशिक्षा इत्यादिनां विषयाणां विकासाय सूचनाः प्रदीयन्ते। दिव्याङ्गानाम् अधिकारानां पूर्त्यर्थम् अन्यथासक्षमानां सामान्य-विद्यालयेषु समावेशनाय शिक्षासूत्रान् विधानान् च रचयति। अपि च संसाधनान् प्रयच्छति।

अत्र दिव्याङ्गाधिकाराधिनियमस्य (२०१६), ऐक्यराज्यसमितेः (UNCRPD) राष्ट्रियशिक्षा-नीतेः (२०२०) च अनुगुणं NCERT छात्राणाम् आवश्यकतानां पूर्तये समान- शिक्षां प्रदातुं कार्यं करोति।

**मुख्यविषयाः**

**समावेशीशिक्षायाः विकासे NCERT इत्यस्य भूमिका-**

i. **पाठ्यचर्यायाः संरचना विकासश्च-**

राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद् राष्ट्रियपाठ्यचर्यारूपरेखां रचयति। या राष्ट्राय मार्ग-दर्शकसूचनाः प्रदातुं कार्यं करोति। राष्ट्रियपाठ्यचर्यारूपरेखा समावेशीशिक्षायाः प्राधान्यं ददाति। यत्र दिव्याङ्गछात्राः अन्यैः छात्रैः सह पठितुं शक्नुवन्ति। पाठ्यपुस्तकानि, शिक्षणविधीन् च मूल्याङ्कनाय सूचनाः प्रयच्छति।

**ii. शिक्षकप्रसिक्षणेन क्षमतायाः निर्माणम्-**

समावेशीशिक्षां दृढीकर्तुं शिक्षकप्रशिक्षणम् अत्यन्तम् आवश्यकं NCERT, NISHTA (National Initiative for School Heads and Teachers' Holistic Advancement) इति कार्यक्रमस्य सहाय्येन पूर्वरत-सेवारतशिक्षकप्रशिक्षणकार्य-क्रमान् आयोजयति। शिक्षकेभ्यः अन्यथासक्षमान् अभिज्ञातुं, शिक्षणाधिगमकार्यक्रमान् अवगन्तुं, कक्ष्यायां प्रविधीम् उपयोक्तुं च प्रशिक्षणं प्रददाति।

**iii. अधिगमसामग्रीणां निर्माणम्-**

दृष्टिबाधितेभ्यः, बधिरेभ्यः च श्रवणोपकरणानि, ब्रेल्-पुस्तकानि डिजिटल्-साधनान् च निर्मातुं NCERT, CIET संस्थया सह मिलित्वा कार्यं करोति। DIKSHA, PM e-vidya इत्यादि मञ्चानां माध्यमेन अन्यथासक्षमान् पठितुम् अवकाशान् प्रददाति।

**iv. एकीकरणम् अनुसन्धानञ्च-**

अन्यथासक्षमैः अनुभूमानावरोधान् ज्ञातुं, शैक्षिकानुसन्धान-द्वारा (NCERT) सर्वेक्षणं निर्वहति। अनुसन्धान-सर्वेक्षणयोः माध्यमेन ज्ञातांशान् शिक्षामन्त्रालयस्य कृते नीतिनिर्माणे च सूचनाः यच्छति।

**क्रियान्वयने पन्थाह्वानानि-**

NCERT इति अनया परिषदा प्रदत्तसूचनानां क्रियान्वयने बहूनि पन्थाह्वानानि सन्ति। यथा-

- विद्यालयेषु सौविध्यानाम् अभावः।
- प्रशिक्षितशिक्षकाणां न्यूनता।
- यद्यपि NCERT इति डिजिटल्-सामग्रीं प्रददाति, तथापि अनेकेषु ग्रामीणक्षेत्रेषु तेषाम् उपयोगाय आवश्यकानाम् उपकरणानाम् अभावः वर्तते।

**NCERT, NEP (२०२०) च इत्यनयोः दृष्टिकोणम्-**

- दिव्याङ्गच्छात्रैः सह अन्येभ्यः छात्रेभ्यः अपि सार्वत्रिक-गुणवत्ताशिक्षायाः प्रदानम्।
- अनुकूलपाठ्यचर्यायाः निर्माणम्।
- प्राथमिकस्तरादारभ्यअन्यथासक्षमेभ्यःव्यावसायिकशिक्षायाः प्रदानम्।

**निष्कर्षः-**

NCERT इति समावेशीशिक्षायै नीतिनिर्माणाय च सहकरोति। समावेशी- पाठ्यचर्यायाः निर्माणे, शिक्षकेभ्यः प्रशिक्षणप्रदाने, अधिगमसामग्र्याः निर्माणे, शैक्षिकानुसन्धाने, भारते साक्षरतायाः सम्पादने च कार्यं करोति।

समावेशीशिक्षा न केवलम् अन्यथासक्षमच्छात्रेभ्यः उपकरोति। अपि तु समाजाय। समावेशीशिक्षायां सर्वे समानावकाशान् प्राप्तुं शक्नुवन्ति। निरन्तररूपेण सहकार्येण नवीनतायाः च माध्यमेन कार्यं करोति। NCERT द्वारा भारते समावेशी, न्यायपूर्णम्, गुणवत्तापूर्णं च शिक्षाव्यावस्थां निर्मातुं महत् कार्यं करोति।

**ग्रन्थसूची-**

https://ncert.nic.in/